तिरुमलतिरुपतिदेवस्थानानि

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका

February 2026

Rs.20/-

SAPTHAGIRI (SANSKRIT)
SPIRITUAL ILLUSTRATED MONTHLY
Volume:12 Issue: 11
February 2026, Price Rs.20/-
No. of pages-24



# श्रीनिवासमङ्गापुरस्थ श्रीकल्याणवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः

## 2026 फिब्रवरी 07 तः 16 पर्यन्तम्



जगत्कल्याणदम्पती श्रीपद्मावतीश्रीनिवासौ अद्यापि नित्यनूतनवधूवरौ भूत्वा दर्शन भाग्यप्रदनित्यकल्याणपुरं श्रीनिवासमङ्गापुरम्। तिरुपतिनगरस्य पश्चिमदिशि दशमैल् दूरे विद्यमानक्षेत्रं श्रीनिवासमङ्गापुरम्। तस्य क्षेत्रस्य उत्तरदिशि परमपावनशेषाचलशिखराणि, निरुतिदिशि चन्द्रगिरि दुर्गं नेत्रपर्वं करोति। सस्यश्यामलप्रकृतापरिसरमध्ये विद्यमानः अयं आलयः पौराणिक चारित्रकसांस्कृतिक सन्निवेशानां निलयचिह्नम्। पद्मावती श्रीनिवासयोः परिणयानन्तरं किञ्चित्कालपर्यन्तं तौ दम्पती अत्रैव निवसितौ। अत्र अर्चामूर्तिः कल्याणवेङ्कटेश्वरः। ताल्लपाकान्नमाचार्यस्य पौत्रः चिनवेङ्गलनाथः श्रीनिवासमङ्गापुरस्थ कल्याणवेङ्कटेश्वरालयस्य जीर्णोद्धरणं चकार। 26.04.1967 तिथौ आलयमेनं ति.ति.देवस्थानं अनुबन्धालयत्वेन स्वीचकार। 1981 संवत्सरादारभ्य अत्र अङ्गरङ्ग वैभवतया ब्रह्मोत्सवाः प्रारब्धाः। अत्र कल्याणोत्सवानन्तरं दीयमान श्रीनिवासकल्यणकङ्कणानि अविवाहितैः धारणात् तेभ्यः आलस्येन विना शीघ्रं कल्याण प्राप्तिर्भविष्यतीति भक्तानां विश्वासः।

| दिनाङ्क | वासरः | प्रातः उत्सवः | रात्रौ उत्सवः |
|---|---|---|---|
| 07-02-2026 | मन्दवासरः | ... | सेनाधिपति- उत्सवः, अङ्कुरार्पणम् |
| 08-02-2026 | भानुवासरः | तिरुच्चि उत्सवः ध्वजारोहणम् | महाशेषवाहनम् |
| 09-02-2026 | इन्दुवासरः | लघुशेषवाहनम् | हंसवाहनम् |
| 10-02-2026 | भौमवासरः | सिंहवाहनम् | मौक्तिकवाहनम् |
| 11-02-2026 | सौम्यवासरः | कल्पवृक्षवाहनम् | सर्वभूपालवाहनम् |
| 12-02-2026 | बृहस्पतिवासरः | आन्दोलिकायां मोहिन्यवतारोत्सवः | गरुडवाहनम् |
| 13-02-2026 | भृगुवासरः | हनुमद्वाहनम् सायं - वसन्तोत्सवः | गजवाहनम् |
| 14-02-2026 | मन्दवासरः | सूर्यप्रभवाहनम् | चन्द्रप्रभवाहनम् |
| 15-02-2026 | भानुवासरः | रथोत्सवः | अश्ववाहनम् |
| 16-02-2026 | इन्दुवासरः | चक्रस्नानम् | तिरुच्चि उत्सवः, ध्वजावरोहणम् |

# गीतामृतम्



श्रीभगवानुवाच -

आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्।
तद्वत्कामाः यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न काम कामी।।

विहायकामान्यस्सर्वान् पुमांश्चरति निस्स्पृहः।
निर्ममोनिरहङ्कारस्स शान्तिमधिगच्छति।।

(भगवद्गीता २.७०,७१)

७०. भावः - सर्वत्र पूरित स्थिरस्वभावः अवधिमतिक्रम्य वा ह्रासस्थित्या वा विना एकरीत्या विद्यमानं सागरं नद्याद्युदकानि यतो प्रविशन्ति प्रविश्यापि तद्रूपाण्येव भवन्ति तद्वत् समस्तकामाः, यस्मिन् ब्रह्मनिष्ठे स्वरूपभूताः उपशमिताः भवन्ति, सः चित्तोपरतिं परमशान्तिरूपमोक्षं प्राप्नोति। विषयासक्तः परमशान्तिं न प्राप्नुयात्।

७१. भावः - यः समस्तकामान् परित्यज्य यस्मिन् विषयेऽपि कांक्षारहितः निस्स्पृहः अहङ्कारयममकारविहीनः सञ्चरति सः परमशान्तिं सकलदुःखनिवृत्तिरूपमोक्षं प्राप्नोति।

विशेषांशः - अनेक नदीनदैः समुद्रे पूरितेऽपि विशेषरीत्या उत्थानं वा ग्रीष्मकाले नदीजलाभावात् ह्रासत्वं वा समुद्रः न प्राप्नोति, तद्वत् दशेन्द्रियद्वारा (नवद्वारेषु स्पर्शेन्द्रियमेकम्) शब्दादि विषयाः हृदये प्रविष्टाः अपि विषयसंकल्पैर्विना हृदयः निर्विषयोऽपि एक विधत्वेन वृद्धिह्रासैर्विना हर्षशोकाभ्यां विना यः भवति सः अचलयोगीति कथ्यते। तादृशस्यैव परमशान्तिः लभ्यते। तादृशस्थितिरहितः योगी न भवति सः कामदासः एव। तस्य शान्तिर्नास्ति। अस्मिन् यः इति यच्छब्द प्रयोगात् एतादृशवरभावविशिष्टः योऽपि मानवः जीवन्मुक्तो भविष्यतीति ज्ञातव्यम्। ५५ श्लोकारभ्ये भगवता यद्बुपदिष्टं अस्मिन्नन्त भागेऽपि तदेवोक्तम्। मध्यस्थ श्लोकाः प्रथमश्लोकर्थमेव पोषयन्ति।

## सङ्कीर्तनम्

परमपुरुष हरि परमपरात्पर
पररिपुभञ्जन परिपूर्ण नमो
कमलापति कमलनाभ कमलासनवन्द्य
कमलहितानन्तकोटिघन समुदयतेज!
मलामलपत्रनेत्र कमलवैरिवर्णगात्र!
मलषट्क योगीश्वर हृदयं तेऽहं नमो नमो
जलनिधिमन्थन जलनिधिबन्धन जलधिमध्यशयन
जलधियन्तविहार मत्स्यकच्छपावतार!
जलनिधिजामात जलनिधिशोषण जलनिधि सप्तकगमन
जलनिधिकारुण्य नमो तेऽहं जलनिधिगम्भीर नमो नम
नगधर नगरिपुनन्दित नगचर यूथपनाथ
नगपारिजातहरसारस पन्नगपतिराजशयन
नगकुलविजय श्रीवेङ्कटनगनायक भक्तविधेय
गनघीराहं ते सर्वेश्वर नारायण नमो नमो।



(अन्नमाचार्य आध्यात्मक सङ्कीर्तनम् - ३७)



आर्जवं हिकुटिलेषु न नीतिः।

# जीवितस्य आवश्यकम्

सम्पादकीयम्

भगवान् एकः एव इति दृढभावः अस्मद्भारतीय सनातनहैन्दव धर्मे अनाद्यः। एकमेव सुवर्णं विविधा भरणत्वेन यथा परिणमते तथैव एकमेव दैवं विविधदेवतारूपे पूजाः परिगृह्णातीति स्पष्टसमन्वयः अस्मत्सनातनधर्मे वर्तते। सर्वाभरणान्यपि सुवर्णरूपाण्येव इति भवन यथा वर्तते तथैव विविधनामानि एकमेव अभिव्यक्तयन्तीति चित्तना हैन्दवेषु सर्वेषु वर्तते। ''लोकोभिन्नरुचिः''। उपासना सामर्थ्यवन्तः महातन्त्रतन्त्रसाधननिमग्नाः भवन्ति। परमात्मानं निर्गुणतत्त्वत्वेन पश्यन्तः योगिनः अन्तरङ्गे एव आविष्कुर्वन्ति। पण्डितैः महाशब्दैः श्लाध्यमानः भगवान् सामान्यैः सामान्यपदैः प्रशस्यते। सर्वेभ्यः स्पन्दनप्रदाता भगवान् सर्वेभ्यः अनेको भवति। इदं सनातनधर्ममौलिकस्वरूपम् आसेतुहिमाचलं ज्योतिर्लिङ्गत्वेन पूज्यमानसदाशिवः, वेदवेत्तृणां रुद्राभिषेकैः, सामान्यजनसमर्प्यमानकेवलजलधाराभिः परवशो भवति। तेषां यं, मं, भोले, हरहर महादेवरावैः सन्तुष्टो भवति। श्रीगजसर्पमुक्तिदाता अमायककन्नप्पमपि श्रीकालहस्तीश्वरः अनुजग्राह। नन्दनारोः मुक्तिप्रदाता चिदम्बरेशः, प्रेमभक्तिसम्पन्नयोः कैवल्यं ददौ। पण्डितेभ्यः आरभ्य निरक्षराज्ञानिपर्यन्तं, योगिनः आरभ्य श्रमजीविपर्यन्तं सर्वविधमनः स्थयिपर्यन्तं विभिन्नरुच्यनुगुणतया बहुविध धर्मरीतीः संस्कृत्य सहस्रशाखाभिः विस्तृतैकमहावृक्षत्वेन स्थितं हिन्दूचैतन्यम्। अनेन वैविध्यलक्षणेन सर्वप्रजाभिमानप्रशंसाः प्राप्नोति। स्वर्गोन्नत्या सह भूलोकपर्यन्तं सर्वसन्निहित संस्कृतौ अस्मद्भगवान् दृश्यते। सर्वलोकेषु प्रत्यणौ भगवान् व्याप्य तिष्ठतीति हैन्दवाभिप्रायः परमात्मा भूत्वा अस्माभिः खेलति, अस्मान् रक्षति च। बेज्ञमहादेवी तिन्नडि कथा अस्माभिः ज्ञाताः एव। परमेश्वरस्य भक्तप्रियत्वं सर्वैः ज्ञातमेव।

शिवाराधनं, भक्तेः आत्मशुद्धेः लोकक्षेमाय शाश्वतमार्गः। शिवाराधने भक्तिज्ञानवैराग्यसेवा भावाः सम्मिश्रिताः भवन्ति। शिवार्चने उपयुज्यमानबिल्वदलगङ्गाजल क्षीरमधुधूपदीपादि समर्पणं आराधकमनसि पवित्रतायाः स्थानं ददाति। माघमासे मुख्यतया महाशिवरात्रिसन्दर्भे जागरणलिङ्गाभिषेकाचरणं महापुण्यप्रदम्। शिवः समन्वयप्रतीका। तस्मिन् सौम्यरौद्रकरुणान्यायादयः समाहारतया वर्तन्ते। शिवः समस्तभूत जातिं समानत्वेन पश्यति। शिवस्मरणं नाम अनन्तत्वस्मरणमेव। शिवानुग्रहात् जन्मबन्धः नश्यति।भक्तिक्षमादयाधर्मत्यागानां मूल्यं शिवाराधनद्वारा अस्माकं हृदये शाश्वतं तिष्ठति। जीविते शिवगुणावलम्बनं भौतिकाध्यात्मिकविजयशिखराणि प्राप्तुं शक्यते। शिवसेवया लोकहितं, आत्महितञ्च साध्यं भवति। शिवाराधनं भक्तेः पराकाष्ठा भवति। जीवितस्य परमानन्दञ्च ददाति।

# फिब्रवरि - २०२६

**सम्पुटिः-१२ सञ्चिका-११**

स्वस्तिश्री चान्द्रमानश्रीविश्वासुनामसंवत्सर माघशुद्धपूर्णिमाभानुवारादारभ्य - फल्गुणशुद्धद्वादशी - शनिवारपर्यन्तम् - २०२६


श्रीनिवासमङ्गापुरक्षेत्रे श्रीकल्याणवेङ्कटेश्वरस्वामिब्रह्मोत्सवः 06
- कुमारी लिङ्गारेड्डि उमामहेश्वरी

दमयन्त्याः पातिव्रत्यवैशिष्ट्यम् 08
- आचार्य जि.पद्मनाभम्

कुलशेखराल्वरारु वर्षतिरुनक्षत्रम् 15
- डा वि.माधवरेड्डि

भक्तेः असाध्यं किमपि नास्ति 17
- डा पि.माधवी

अहङ्कारः अवमानायैव 19
- डा के.कोटेश्वरय्य

मातृप्रेम माधवमपि वशीकरोति (चित्रकथा) 20
- डा.के.सूर्यनारायणरेड्डि

द्वादशराशीनां फलानि 22
- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः


मुखचित्रम् - उभयदेवीसमेतश्रीकल्याणवेङ्कटेश्वरस्वामिनः, श्रीनिवासमङ्गापुरम्।

अन्तिमपुटचित्रम्ः- परमभागवतत्तोमाः श्रीकुलशेखराल्वारुमहोदयाः।


## सङ्केतः

प्रधानसम्पादकः,
सप्तगिरिः, ति.ति.देवस्थानानि
तिरुपतिः - ५१७ ५०७.

दूरभाषा - ०८७७ - २२६४५४३, २२६४३५९
प्रधानसम्पादकः,
०८७७ - २२६४३६३

सूचनानाम्, आक्षेपाणां च कृते
सम्पर्क कुर्वन्तु -

editorsapthagiri@gmail.com


एका पत्रिका : रू.२०/-
वार्षिकग्राहकत्वम् रू.२४०/-
आजीविक ग्राहकत्वम् रू.२४००/-

*वेङ्कटाद्रिसमं स्थानं*
*ब्रह्माण्डे नास्ति किञ्चन ।*
*वेङ्कटेशसमो देवो*
*न भूतो न भविष्यति ॥*


तिरुमलतिरुपतिदेवस्थानम्

# सप्तगिरिः

आध्यात्मिकसचित्रमासपत्रिका





गौरवसम्पादकः-
श्री अनिल् कुमार सिंघाल् I.A.S.,
कार्यनिर्वहणाधिकारी, ति.ति.देवस्थानानि।

प्रकाशकः -

सम्पादकः, प्रधानसम्पादकः( F.A.C.)
डा॥ वि.जि.चोक्कलिङ्गम्, M.A., Ph.D.,

मुद्रापकः -

श्री आर्.वी.विजयकुमार् B.A.,B.Ed.,
उपकार्यनिर्वहणाधिकारी
मुद्रणालय - पुस्तकविक्रयक्रेन्द्रम्
ति.ति.देवस्थानम्, तिरुपति

मुख्यछायाचित्रग्राहकः -
श्री पि.एन्.शेखरः,
छायाचित्रग्राहकः, ति.ति.दे.
श्री बि.वेङ्कटरमणः, सहायक-छायाचित्रग्राहकः, ति.ति.दे.






सूचना
मुद्रितलेखानां विचाराः लेखकानामेव।
एतद्विषये अस्माकं दायित्वं नास्ति।
*– प्रधानसम्पादकः*




इह प्रेत्य च नारीणां पतिरेको गतिः सदा।




## श्रीनिवासमङ्गापुरक्षेत्रे

# श्रीकल्याणवेङ्कटेश्वरस्वामिब्रह्मोत्सवः

- कुमारी लिङ्गारेड्डि उमामहेश्वरी
चरवाणी - ९१८२०७५७६१

तिरुमलतिरुपतिदेवस्थानप्रसिद्धालयेषु प्रधानतमः आलयः श्रीश्रीनिवासमङ्गापुरक्षेत्र विराजमानस्य श्रीकल्याणवेङ्कटेश्वरस्वामिदिव्यदेवालयः। असौ पुरातनः आलयः विष्ण्वालयः। असौ जातीयस्मारकरक्षणचिह्नेषु अन्यतमः भवेत्।

१९६७ वर्षे तिरुमलतिरुपतिदेवस्थानं स्वीकृत्य तदारभ्य अर्चनादिकं वैखानसागमशास्त्रोक्तरीत्या अर्चकैः अनुष्ठीयते। १९८१ वत्सरादारभ्य ब्रह्मोत्सवः प्रवर्तते। पद्मावतीं परिणीय अगस्त्यमहामुनेः समीपमागत्य सूचनानन्तरं क्षेत्रेऽस्मिन् षण्मामकालपर्यन्तं निवासमकरोत् इति पुराणकथा एका श्रूयते।

अतः अविवाहिताः सर्वे विवाहार्थं आगत्य रक्षाकङ्कणं धृत्वा दीक्षाधारिणः भवन्ति।

प्राङ्मुखः असौ आलयः विशालेऽस्मिन् प्राङ्गणे पुष्करिणी हनुमदालयसमेतगोपुरेण महासुन्दरतया प्रतिभाति। ३६ अङ्गुलाक्षतपरिमाणरूपेण गर्भालये स्वामी विराजते।

तस्य स्वामिनः ऊर्ध्वहस्तयोः शङ्खं चक्रं च अधोहस्तौ वरदकटिरूपौ भवतः।

दिव्यसौकुमार्यनिरवद्यलावण्यातिशयेन स्वामी शरण्यस्सन् पुष्पमालालङ्कृतैः दिव्याभरणैः कौशेयवस्त्रैः किरीटमकुटचूडावतंसमुखसौन्दर्येण स्थानकमूर्तित्वेन च प्रतिभाति सर्वान् भक्तजनान् अनुगृह्णाति च।

अर्धमण्टपे तावत् लक्ष्मीनारायणः आसनरूपेण श्रीमहाविष्णुः शयनरूपेण श्रीराम श्रीकृष्ण मूर्तिविशेषाः राराजमानाः सन्ति।

स्थानक-आसना-शयन रूपाःसृष्टिस्थितिलयानां प्रतिनिधित्वेन राराजमानास्सन्ति अत्र।

### आलयवर्णनम् -

महद्वारगोपुरं स्वर्णध्वजस्तम्भं, स्वर्णबलिपीठं विमानप्रदक्षिणं, पाकशाला, यागशाला, कल्याणमण्टपं, वाहनमण्टपं, अन्तः गरुडालयः जय-विजयौ घण्टा महामण्टपं मुखमण्टपं अर्धमण्टपं गर्भालयः विद्यन्ते।

श्रीदेवी-भूदेवी समेत श्रीनिवासस्य उत्सवमूर्तयः विशेषरूपेण वीथ्युत्सवार्थं च विराजन्ते।

वैखानसागमोक्तरीत्या अर्चनोत्सवादयः नित्यनैमित्तिक काम्योत्सवाः वैभवेन प्रचलन्ति अद्य।

माघमासे श्रवणानक्षत्रे अवभृथं, चक्रस्नानं सङ्कल्प्य नवाह्निकरीत्या ब्रह्मोत्सवः वैदिकया पद्धत्या प्रचलतीति नैव सन्देहलेशः। तं उत्सवं यथाशक्ति परिशीलयामः।



**ब्रह्मोत्सवः -**

कल्याणवेङ्कटेश्वरस्वामिनः ब्रह्मोत्सवः नवाह्निकरीत्या प्रचलति। नवदिन ब्रह्मोत्सवस्य पूर्वस्मिन् दिने सायंकाले महामण्टपे मृत्संग्रहणं कृत्वा विष्वकसेनास्य वीथ्युत्सवः यागशालायां अङ्कुरार्पणं च वैखानसार्चकादिभिः अनुष्ठीयते।

प्रथमदिने प्रातःकाले स्वामिनः आराधनं परिसमाप्य ध्वजवस्त्रप्रतिष्ठा कृत्वा आलयबलिना सह ग्रामबलिप्रदानं नवसन्धिपूर्वकदेवता बलिः वीथ्युत्सवेन सह मन्त्र-तन्त्र-गद्य-पद्य-स्तुतिवाक्यैः इन्द्रादि अष्टदिक्पालान् आवाह्य ध्वजस्तम्भसमीपं आगत्य ध्वजस्थगरुडं आराध्य ध्वजपटस्य गरूडस्य च मुद्रान्नं विनिवेद्य सुमुहूर्ते ध्वजपटं ध्वजस्तम्भाग्रभागं च प्रेषयन्ति।

अनेन ध्वजारोहणकर्मणा ध्वजस्थगरुडः सर्वान् ऊर्ध्वलोकान् देवान् उत्सावार्थं च आह्वयतीति विश्वासः।

प्रतिदिने रात्रौ प्रातः ग्रामबलिं आलयबलिं च शुद्धान्नं समर्प्य वीथ्युत्सवाः कुर्वन्ति।

प्रथमदिने रात्रौ सप्तफणसहितशेषवाहनं

द्वितीयदिने प्रातः पञ्चफणसहितशेषवाहनं रात्रौ हंसवाहनं

तृतीयदिने प्रातः सिंहवाहनं रात्रौ मौक्तिकवाहनं

चतुर्थदिने प्रातः कल्पद्रुमवाहनं रात्रौ सर्वभूपालवाहनम्

पञ्चमदिने प्रातः मोहिनीअवतारोत्सवः रात्रौ गरुडवाहनम्

षष्ठेऽस्मिन् दिने प्रातः आञ्जनेयवाहनं रात्रौ गजवाहनम्

सप्तमदिने प्रातः सूर्यवाहनं रात्रौ चन्द्रवाहनम्

अष्टमदिने प्रातः रथोत्सवः रात्रौ अश्ववाहनम्

नवमदिने प्रातः चक्रस्नानं रात्रौ ध्वजावरोहणं च करिष्यन्ति।

श्रीभूसहित उत्सवमूर्तिं तत्तद्वाहनेषु संस्थाप्य अलङ्कृत्य राजोपचारैः भाष्याचार्यैः विविधमङ्गलध्वनिभिः सह वीथ्युत्सवाश्च अनुष्ठीयन्ते।

विशेषतः नवमदिने प्रातःकाले चूर्णोत्सवं कृत्वा पुष्करिणीतीरं समासाद्य पुण्याहं कृत्वा क्षीर - दधि - मधु - फलोदक - चन्दनादिद्रव्यैः संस्नाप्य चक्रं तीर्थजले निमज्य स्नानं च कुर्वन्ति आचार्यार्चकादयः।

तस्मिन्नेव समये बहव भक्ताः यजमानजनाः स्नानं कृत्वा पुण्यं संपाद्य जन्मसाफल्यं साधयन्ति च।

रात्रौ ध्वजावरोहणेन कर्मणा ब्रह्मोत्सवः समाप्तिमेष्यति।

श्रीश्रीनिवासमङ्गापुर क्षेत्राधिनाथस्य श्रीकल्याण वेङ्कटेस्वरस्वामिनः असौ ब्रह्मोत्सवः सर्वेषां भक्तजनानां यजमानजनानां च सर्वयज्ञफलप्रदः काल्यणकामुकः तुष्टिं पुष्टिं च प्रददातु इत्याशास्य विरमामि।

कल्याणं सर्वेभ्यः भवद्भ्यः वितरतु कल्याणवेङ्कटेश्वरस्वामी।

- आचार्य
जि.पद्मनाभम्

चरवाणी -
९२४७३२८२८६



# दमयन्त्याः पातिव्रत्यवैशिष्ट्यम्

**कर्कोटकस्य नागस्य दमयन्त्याः नलस्य च।
ऋतुपर्णस्य राजर्षेः स्मरणं पापनाशनम्।।**

बृहदश्वमहर्षिणा नलदमयन्ती कथा स्वबाधा तप्तधर्मराजाय उक्ता -

निषधदेश पालकः नलः, गुणी, परमसुन्दरः, सत्यवादी, जितेन्द्रियः सर्वप्रियः, वेदवेत्ता आसीत्। सर्वसद्गुणसम्पन्नः महा पराक्रमवान् आसीत्। तेष्वेव दिनेषु भीमकनाम राजा विदर्भदेशं पालयति स्म। भीमकस्य एकैक पुत्री दमयन्ती लक्ष्मीवद्रूपवती देवताधिकमहासौन्दर्यवती आसीत्। निषधविदर्भदेशयोः राजोद्योगिनः गमनागमने कुर्वन्ति स्म। ते दमयन्तीसौन्दर्य मधिकृत्य नलस्य, नलगुण सौन्दर्यान्यधिकृत्य दमयन्त्यै वदन्तः उभयोर्मध्ये प्रणयाङ्कुराय हेतुभूताः आसन्।

कदाचिन्नलः उद्याने विहरन् समीपागतहंसानामेकं जग्राह। सः हंसः मानवभाषायां मां त्यज प्रतिफलत्वेन विदर्भदेशराजकुमार्यै दमयन्त्यै त्वामधिकृत्य अनुरागजनकतया उक्त्वा उभयोः विवाहसम्भवप्रयत्नं करिष्यामीत्यवोचत्। हसन्नलः तं तत्याज। बहवः हंसाः विदर्भदेशं गत्वा दमयन्तीसन्निधिं प्राप्ताः। तदा दमयन्त्या एकस्य हंसस्य स्वीकरणप्रयत्ने कृते सः हंसः ''दमयन्तीमुद्दिश्य हे दमयन्ति! निषधदेशाधीशः नलमहाराजः पुरुषश्रेष्ठः। त्वं महासौर्न्दन्यवती स्त्रीरत्नम्। युवयोः दाम्पत्यमयोघं भविष्यतीत्यवोचत्। दमयन्ती मामधिकृत्यापि तथैव नलस्य वदत इति हंसमुक्त्वा हंसस्वीकरणप्रयत्नं तत्याज।

विदर्भराजः भीमकः दमयन्त्यै विवाहर्थं स्वयंवरं प्रकटीचकार। भूलोकस्थाः राजानः विदर्भदेशं गताः। इन्द्रादिदेवताः अपि नारदद्वारा विषयं ज्ञात्वा विदर्भं प्रापुः। नलोऽपि स्वयंवराय विदभदेशं प्रतस्थे। सूर्यप्रभाकान्तिवन्तं नलं देवताः आत्मभ्य दूतत्वेन व्यवहर्तुं नलमपृच्छन्। नलः दूतत्वाय अङ्गीकृत्य अहमपि स्वयंवराय गच्छामीतिप्रोवाच प्रथमतः दूतत्वाय नाङ्गी चकार। पश्चात् त्वं सत्यव्रतः अवश्यं दूतकार्यं निर्वर्तितव्यम्। निरातङ्कतया अन्तःपुर प्रवेशः तव भवेदित्यवोचत्। इन्द्रोक्तरीत्या नलः निरातङ्कं दमयन्तीसकाशं जगाम। दमयन्तीसख्यः तत्सौन्दर्यं दृष्ट्वा आश्चर्यनिमग्नाः आसन्। दमयन्त्यपि तं दृष्ट्वा तुतोष। नलः देवतापक्षतया दौत्यविषयं व्यवरीत्। दमयन्ती नलेन विना नान्यं वरिष्यमीति दृढमवोचत्। इन्द्रदिदेवताः स्वयंवरे नलरूपे आसनेषु उपविष्टाः। दमयन्ती दिक्पालादिराजभ्यः नलमेव वरिष्यामीति स्वाभिप्रायमुवाच। देवताः दयया निजरूपाणि प्रदर्शयामासुः। तुष्टा दमयन्ती नलं वव्रे। नलः दमयन्तीचातुर्यमभिनन्दितवान्। देवताः नलस्य बहुमानत्वेन एवं वराणिददुः। इन्द्रः यज्ञे स्वदर्शनं भविष्यतीति, अग्निः स्मरणादेव प्रत्यक्षी भविष्यामीति, यमः पाकशालाप्रावीण्यं

ददामीति, वरुणः नलस्य इच्छाप्रदेशे जलमुद्भविष्यतीत्येवं वराणि दत्वा अदृश्यमभूवन्। नलः दमयन्त्या निषधदेशं प्राप्य अश्वमेधयागं कृत्वा एकं पुत्रं एकां पुत्रिकाञ्चावाप।

इन्द्रादिदेवताः स्वर्गगमनसमये कलिं दृष्ट्वा प्रयाणकारणं पप्रच्छुः। सः दमयन्तीस्वयंवरार्थं गच्छमीष्यवोचत्। इन्द्रः दमयन्ती स्वयं वरे नलं वृणीतवतीत्पवोचत्। आग्रहोदग्रः कलिः नलं राज्यच्युतं कृत्वा दमयन्तीं पृथक्करिष्यामीति उक्त्वा नलराजधीनां प्रविश्य अनुकूलसमयार्थं निरीक्षतेस्म। तत्र द्वादशवर्षाः गताः। कदाचित् कलिः नलस्य अशुचिसमये तस्मिन् प्रविश्य वेषान्तरे नलसोदरं पुष्करं नलेन सह द्यूतकर्माणि तं पराजितं कृत्वा राज्यं स्वाधीनं कुरु इति प्रोत्साहयामास। कलिः द्वापरे मायाक्षतरूपं प्राप्य पुष्कराय अनुकूलो बभूव। आदौ द्यूताक्रीडां नलः तिरश्चकार। पुष्करेण बहुवारं प्रार्थनया द्यूतक्रीडामङ्गीकृत्य शनिप्रभावात् सर्वराज्यसम्पदः पणं कृत्वा पराजितः स्वपुत्रं पुत्रीञ्च विदर्भदेशं प्रापयमास। अहमपित्वया आगमिष्यमीति निर्बन्धप्रार्थनया तां दमयन्तीं स्वीकृत्य तया सह अटवीं प्रविवेश। अटव्यां सुवर्ण पक्षिणः दृष्ट्वा स्वर्णाशया स्वर्णपक्षिबन्धनाय अङ्गवस्त्रं उपर्याकाशे पातयामास। ते पक्षिणः न वयं सुवर्णपक्षिणः। अक्षतारूपे त्वां राज्यच्युतं कृतवन्तः द्यूताक्षताः इत्युक्त्वा नलस्य अङ्गवस्त्रेण सह आकाशं जग्मुः। वस्त्रा भावात् दमयन्ती स्वधृतवस्त्रे अर्धं तस्मै ददौ। पश्चात् अरण्ये गच्छन्तौ बहुदिग्गमनकूटमीं द्वौ प्रापतुः। नलः दमयन्त्यै कस्मिन् मार्गे कुत्र गन्तुं शक्यते इति सूचनाः ददौ। सङ्केतार्थं ज्ञात्वा दमयन्ती अहं त्वया सहैवागमिष्यामि नाहं स्वदेशं गमिष्यामीत्यवोचत्। ततः द्वावपि एकत्र धर्मशालां प्रापतुः। दमयन्ती मयिअदृश्ये स्वराज्येपितृगृहं गमिष्यतीतिमत्वा अर्धरात्रौ तां परित्यज्य अन्यप्रदेशं जगाम। अदृष्टे नले निराशापरा भर्तारमन्विष्यन्ती आसीत्। दुःखोन्मादावस्थायां स्थितायां तस्यां महासर्पेण तां खादितुं प्रयत्ने कृतेऽपि स्पृहविहीना आसीत्। इदं दृश्यं कश्चित् मृगयाविनोदी दृष्ट्वा तं सर्पं हत्वा दमयन्तीं ररक्ष। परन्तु ततः तत्सौन्दर्यमोहितः तां बलात्कर्तुं प्रायतत। तदा सा पातिव्रत्यमाहात्म्यात् तं शपित्वा मृतञ्चकार। पुनः नलमन्विष्यन्ती कञ्चिदृषिबृन्दं प्राप्य स्ववृन्तान्तं निवेद्य रक्षणार्थमयाचत। ते ऋषयः नल पुनः राज्यं प्राप्य राज्य पालनं करिष्यति। युवयोः पुनस्समागमः भविष्यतीत्युक्त्वा अदृश्यं गताः। आश्चर्यचिकिता सा पश्चात् वर्तकजनसमूहं प्राप्य तेषां साहाय्येन चेदिदेशसुबाहुराज्यं प्रविवेश। वीथीषु गच्छन्त्यां तस्यां गवाक्षात् राजमाता तां दृष्ट्वा स्वसकाशमागन्तुमाहूतवती। तत्र दमयन्ती नियमबद्धा स्वेच्छमुवास।

दमयन्तीं परित्यज्य नलः अटव्यां गच्छन् दावाग्निमपश्यत्। तदग्नेः रक्षरक्ष इति शब्दं श्रुत्वा नलः दावाग्निसमीपं गच्छन् कर्कोटकसर्पमपश्यत्। तं अग्नेः ररक्ष। ततः किञ्चिद्दूरगमनान्तरं सर्पराजः कर्कोटकः तमदशत्। विषप्रभावात् नलस्य रूपं परिणतं विकृतं जातम्। सः कर्कोटकः नलमुद्दिश्य हे राजन्! इतः परं तव शत्रुभयं न भवेत्। बाहुकनम्ना अयोध्यापालकस्य रथसारिथिः भव। सः राजा तव मित्रं भविष्यति। त्वं तस्य प्रथमतः अश्वविद्यां अध्यापयित्वा तस्मात् द्यूतविद्यानैपुण्यं प्राप इत्युक्त्वा अदृश्यः बभूव। तद्गमनानन्तरं नलः ऋतुपर्णराजस्य सकाशं गत्वा बाहुकनम्ना तस्य रथसारथिर्बभूव। राजा बाहुकं अश्वशालाध्यक्षं कृत्वा दशसहस्रसुवर्णनाणेक वेतनं ददाति स्म। उभयोः सन्मैत्री बभूव। विदर्भ राजः भीमकः नलदमन्त्योः वियोगं ज्ञात्वा चिन्ताकुलः कांश्चित् ब्राह्मणान् मेधाविनः दमयन्त्यन्वेषणार्थं प्रेषयन् तेभ्यः दशसहस्रगावः दास्यामीति प्रकटीचकार। तेषु सुदेवब्राह्मणः





चेदिराजधानीं प्राप्य अन्तःपुरस्थां दमयन्तीं ज्ञातवान्। ज्ञातविषया राजमाता दमयन्तीं आलिङ्ग्य त्वं मम सोदरीतनयेति तस्यै बहुबहमतीः दत्वा आन्दोलिकायां बहुरक्षकैस्सह विदर्भं प्रेषयामास। भीमकः दमयन्तीं दृष्ट्वा सन्तुष्टः सुदेवाय दशसहस्रगाः, एकं ग्रामं पर्याप्तधनञ्च ददौ।

पश्चाद्दमयन्ती नलान्वेषणर्थं ब्राह्मणान् वक्तव्यमुक्ता प्रेषयामास। पर्णादः ब्राह्मणः अयोध्यापालकस्य ऋतुपर्णस्य रथसारथिर्भूत्वा बाहुकनम्ना नलः राज्ञः मित्रं भूत्वा सन्मैत्र्या व्यवहरतीति विषयं दमयन्त्यै निवेदयामास। दमयन्ती पुनः ऋतुपर्णसकाशं सुदेवं प्रेषयित्वा दमयन्तीस्वयंवरं विदर्भाधिपतिः प्रकटीचकारेति तदर्थं ऋतुपर्णस्य आह्वानं प्रेषयामास। अत्र अन्तरार्थः कःइति चेत् यदि बाहुकः एव नलः स्यात् ऋतुपर्णं निर्णीते समये एव आनेष्यतीति। वायुवेगेन रथचालने नलः महासमर्थः। अन्यः कोऽप्यसमर्थः इति ज्ञात्वा ऋतुपर्णः बाहुकमुद्दिश्य श्वः एव मां विदर्भं प्रापयेति रथं संसिद्धं कुरु इति बाहुकमाज्ञापयामास। बाहुकः तदर्थमङ्गीचकार। महावेगेन पक्षी इव गच्छन्तं रथं दृष्ट्वा आश्चर्यचकितः स्वगणित विद्याप्रावीण्यं प्रदर्शयितुं अस्य आम्रवृक्षस्य लक्षपत्राणि सहस्रफलानिभवन्तीत्यवोचत्। बाहुकः तन्निर्धार्य आश्चर्यचकितः आसीत्। ततः द्यूताक्षविद्यारहरूयान्यपि अध्यापयिष्यामीत्युक्त्वा राजा अश्वसारथ्यनैपुण्यं अध्यापयितुमपृच्छत्। बाहुकः ऋतुपर्णात् द्यूताक्षमर्माणि अधीतवान्। झटित्येव ककोटकसर्पराजविषः शरीरात् बहिर्जगाम। रथः विदर्भं प्रविवेश। रथशब्दं श्रुत्वा दमयन्ती नलचक्रवर्तितरथशब्दः एवेति निर्धारितवती। अज्ञातस्वयं वरवृत्तान्तः भीमकः ऋतुपर्णमाहूय कुशलप्रश्नैः सह आतिथ्यं ददौ। ऋतुपर्णः स्वयंवरचिह्नाभावात् आश्चर्यचकितः मौनेनासीत्। बाहुकं ज्ञातुं दमयन्ती केशिनीदासीं प्रेषयामास। सा प्रतिनिवृत्य बाहुकः इच्छाप्रदेशे जलं अग्निं सृजतीति दमयन्तीमुवाच। तदा बाहुकः एव नलः इति निश्चीय दमयन्ती स्वपुत्रं पुत्रीञ्च बाहुकसकाशं प्रेषयामास। बाहुकः पुत्रौ प्रेम्णा अङ्केनिधाय चुम्बनानन्तरं दुःखमग्नः आसीत्। ततः बालकौ स्वपुत्राविव वर्तन्ते इति केशिनीमुक्त्वा पितृप्रेम बहिरागच्छतीति पुनः पुनः मत्सकाशंमागच्छेत्यवोचत् केशिनी इमान् विषयान् दमयन्त्यै निवेदतिवती। दमयन्ती स्वमातुः विषयान् सर्वानुक्त्वा बाहुकं स्वान्तःपुरमानयामास। दमयन्तीदर्शनात् बाहुकः दुःखेन विललाप। तदा दमयन्त्यपि तथैव विललाप ततः नलः दमयन्तीमुद्दिश्य मया राज्यं स्वेच्छया न परित्यक्तम्। अटव्यां त्वां एकाकिनीं कर्तुं त्वं मातृदेशं गृहं गमिष्यसीति आशा आसीत्। शनिप्रभावात् एतानि कष्टानि प्राप्तानीति कर्कोटकस्मरणात् नलः निजरूपमवाप। ततः नलदमयन्त्यौ गाढपरिष्वङ्गलीनौ अभूताम्। पश्चात् नलः पुष्करं द्यूते पराजित्य स्वराज्यं स्वाधीनं कृत्वा प्रजारञ्जकतया राज्यमपालयत्।

दमयन्ती अटव्यां कामपरवशः बलाकर्तुं सन्नद्धं मृगया विनोदिनं स्वपातिव्रत्यप्रभावात् शपित्वा मृतञ्चकार। अटव्यां भर्त्रा सह सर्वक्लेशाननुभतवती। पातिव्रत्यप्रभावात् स्वबुद्धिवैभवेन भगवत्साहाय्यात् भर्तारं पुनः प्राप्य महासाध्वीति निरूपयामास। अत एव

**कर्कोटकस्य नागस्य दमयन्त्याः नलस्य च।**
**ऋतुपर्णस्य राजर्षेः स्मरणं पापनाशनम्।। इति सत्यमेवोक्तम्।**

# शिवपञ्चाक्षरीस्तोत्रम्



१. नागेन्द्रहाराय त्रिलोचनाय
भस्माङ्गरागायमहेश्वराय।
नित्यायशुद्धाय दिगम्बराय
तस्मै नकाराय नमश्शिवाय।।

२. मन्दाकिनी सलिलचन्दनचर्चिताय
नन्दीश्वरप्रमथनाथमहेश्वराय।
मन्दारपुष्पबहुपुष्पसुपूजिताय
तस्मै मकाराय नमश्शिवाय।।

3. शिवाय गौरीवदनाब्जबृन्द
सूर्याय दक्षाध्वरनाशकाय।
श्रीनीलकण्ठाय वृषध्वजाय
तस्मै शिकाराय नमश्शिवाय।।

४. वसिष्ठकुम्भोद्भवगौतमादि
मौनीन्द्रदेवार्चित शेखराय।
चन्द्रार्कवैश्वानर लोचनाय
तस्मै वकाराय नमश्शिवाय।।

५. यक्षस्वरूपाय जटाधाराय
पिनाकहस्ताय सनातनाय।
दिव्यायदेवाय दिगम्बराय
तस्मै यकाराय नमश्शिवाय।।

६.पञ्चाक्षरमिदं पुण्यं यः पठेत् शिवसन्निधौ।
शिलोकमवाप्नोति शिवेन सह मोदते।।

इति श्रीमच्छङ्कराचार्य विरचित
शिवपञ्चाक्षरी स्तोत्रं सम्पूर्णम्

# विश्वनाथाष्टकम्

१. गङ्गातरङ्गरमणीयजटाकलापं,
गौरीनिरन्तरविभूषित वामभागम्।
नारायणप्रियमनङ्गमदापहं
वाराणसीपुपतिं भज विश्वनाथम्।।

२. वाचामगोचरमनेकमुण स्वरूपम्,
वागीशविष्णु सुरसेवितपादपीठम्।
वामेन विग्रहवरेण कलत्रवन्तं,
वाराणीपुरपतिं भज विश्वनाथम्।।

३. भूताधिपं भुजगभूषण भूषिताङ्गं,
व्याघ्राजिनाम्बरधरं जटिलंत्रिनेत्रम्।
पशाङ्कुशाभयवरप्रदशूलपाणिं,
वारणसीपुरपतिं भजविश्वनाथम्।।

४. शीतांशुशोभित किरीट विराजमानं,
फालेक्षनानल विशोषित पञ्चवाणम्।
नागाधिपारचित भासुरकर्णपूरम्
वाराणसीपुरपतिं भजविश्वनाथम्।।

५. पञ्चाननं दुरितमत्तमतङ्गजानां,
नागात्कं दनुजपुङ्गव पन्नगानाम्।
दावानलं मरण शोकजराटवीनां
वाराणसीपुरपतिं भज विश्वनाथम्।।

६. तेजोमयं सगुणनिर्गुमद्वितीयं
आन्दकन्दमपराजित मप्रमेयम्।
नागात्मकं सकलनिष्कलमात्मरूपम्
वाराणसीपुरपतिं भजविश्वनाथम्।।

७. रागादिदोषरहितं स्वजनानुरागं
वैराग्य शान्तिनिलयं गिरिजासहायं।
माधुर्यधैर्य सुभगं गरलाभिरामं
वाराणसीपुरपतिं भजविश्वनाथम्।।

८. आशां विहाय परिहृत्य परस्यनिन्दां
पापेरतिश्च सुनिवार्यमनस्समाधौ।
आदायहृत्कमलमध्यगतं परेशं
वाराणसीपुरपतिं भजविश्वनाथम्।।

९. वाराणसीपुरपतेः स्तवनं शिवस्य
व्याख्यातमष्टकमिदं पठते मनुष्यः।
विद्यां श्रियं विपुलसौख्यमनन्तकीर्तिं
सांप्राप्यदेहविलये लभतेच मोक्षम्।।



विश्वनाथाष्टकमिदं यः पठेत् शिवसन्निधौ
(शिवलोकमवाप्नोति शिवेन सह मोदते।)

# शिवाष्टकम्



१.तस्मै नमः परमकारणकारणाय
दीप्तोज्ज्वलज्ज्वलित पिङ्गललोचनाय।
नागेन्द्रहाराकृत कुण्डलभूषणाय
ब्रह्मेन्द्रविष्णु वरदाय नमशिवाय।।

२. श्रीमत्प्रसन्न शशिपन्नगभूषणाय
शैलेन्द्रजा वदनचुम्बितलोचनाय।
कैलासमन्दर महेन्द्रनिकेतनाय
लोकत्रयार्तिहरणाय नमशिवाय।।

३.पद्मावदातमणिकुण्डलगोवृषाय
कृष्णागुरुप्रचुरचन्दनचर्चिताय।
भस्मानुषक्त विकचोत्पलमल्लिकाय
नीलाब्जकण्ठ सदृशाय नमशिवाय।।

४. लम्बत् सपिङ्गल जटामकुटोत्कटाय
दंष्ट्राकरालविकटोत्कट भैरवाय।
व्याघ्राजिनाम्बरधराय मनोहराय
त्रैलोक्यनाथ नमिताय नमशिवाय।।

५. दक्षप्रजापति महामख नाशनाय
क्षिप्रमहात्रिपुर दानव घातनाय।
ब्रह्मोर्जितोर्ध्वगकरोटिनिकृन्ताय
योगाय योगि नमिताय नमशिवाय।।

६. संसारसृष्टिघटनापरिवर्तनाय,
रक्षःपिशाचगणसिद्धसमाकुलाय।
सिद्धोरग ग्रहगणेन्द्र निषेविताय
शार्दूलचर्म वसनाय नमाशिवाय।।

७. भस्माङ्गरागकृतरूपमनोहराय,
सौम्यावदात वनमाश्रितमाश्रिताय।
गौरीकटाक्षनयनाधीनिरीक्षणाय,
गोक्षीरधार धवलाय नमशिवाय।।

८. आदित्यसोमवरुणानिलसेविताय,
यज्ञाग्निहोत्र वरधूम निकेतनाय।
ऋक्सामवेदमुनिभिः स्तुतिसंयुताय,
गोपाय गोपनमिताय नमशिवाय।।

शिवाष्टकमिदं पुण्यं यः पठेत् शिवसन्निधौ।
शिवलोकमवाप्रोति शिवेनसह मोदते।।
(इति श्रीमच्छङ्कराचार्य विरचितं शिवाष्टकं सम्पूर्णम्)

वैकुण्ठैकादशीपर्वदिनं (30.12.2025) पुरस्कृत्य कलियुगवैकुण्ठं तिरुमलक्षेत्रं निजवैकुण्ठं स्मारयति। तस्मिन्दिने प्रातः आरभ्य प्रमुखादिसामान्यभक्तपर्यनं ''स्लाट्'' पद्धतिमनुसृत्य पंक्तिमार्गद्वारा गत्वा भक्ताः वैकुण्ठद्वारदर्शनं चक्रुः। श्रीदेवी भूदेवीसमेतमलयप्पस्वामी तस्मिन्दिने उदये स्वर्णरथे चतुर्माडवीथीषु नयनपर्वतया परिभ्रमणं चकार। इदं पर्वदिनं पुरस्कृत्य तिरुमलक्षेत्रे प्रत्येकालङ्करणानि चक्रुः। वैकुण्ठैद्वादशी(31.12.2025) दिने स्वामिनः पुष्करिण्यां श्रीसुदर्शनचक्रत्ताल्वारोः चक्रस्नानं कारितम्।















# कुलशेखराल्वारु वर्षतिरुनक्षत्रम्



- डा वि.माधवरेड्डि

चरवाणी
९९४८५२३२५९

**कुम्भेपुनर्वसौ जातं केरले कोलिपट्टणो।**
**कौस्तुभांशं धराधीशं कुलशेखरमाश्रये।।**
**युष्यते यस्य नगरे रङ्गयात्रा दिनदिने।**
**तमहं शिरसा वन्दे राजानं कुलशेखरम्।।**

कुलशेखरः कविः विष्णु भक्ताग्रेसरः। अयं कलियुगप्रारभेक्रीन्श ७६७ संवत्सरे जातः इति चारित्रकाः वदन्ति। अनेन कविकुलशेखरेण विरचितां मुकुन्दपादारविन्दार्पित सुमनोमालां मुकुन्दमालां विष्णुभक्ताः स्वकण्ठमालां अवश्यं कुर्वन्ति। अस्यां मुकुन्दमालायां त्रिपञ्चाशत् श्लोकाः वर्तन्ते। अयं प्रजारक्षणे दृढव्रतः केरलदेशे कोलिपट्टणे स्थितं राज्यं प्रजारक्षणदृटव्रतः पालयति स्म। बहुकालपर्यन्तं सन्तानरहितः। श्रीहरिकटाक्षात् बहुकालानन्तरं पुत्रमेकमवाप। राजकुलस्य शेखरत्वात् तस्य कुलशेखरः इति नाम कृत्वा ब्रह्मणेभ्यः आनन्दपरवशः भूरिदक्षिणाः सुवर्णगवाश्वहस्तीन् दानं ददौ। सार्थकनामकः अयं वेदवेदाङ्गानि धनुर्वेदं अभ्यस्य एक सन्धाग्राहीभूत्वा सर्वविद्याः करतलामलकञ्चकार। युक्तवयसि राजा पुत्रं यौवराज्याभिषेकं कृत्वा राज्य पालनभारं पुत्रे निक्षिप्य विश्रान्तिं स्वीचकार। जानाः ईतिबाधारहिताः तस्य पालने आसन्। धर्मदेवता पाद चतुष्टयेन चलति स्म। कुलशेखरपालने अजाः व्याघ्राश्च एक जलाशये सन्निहिताः जलं पिवन्ति स्म। विष्कक्सेनः एव आगत्य तस्य पञ्चसंस्कारान् चकार। विष्णुभक्तेभ्यः दासानुदासः अयं वेङ्कटेश्वरस्वामिन्यपि अतीव भक्तिमानासीत्। वेङ्कटाद्रिसोपानमपि नाभवमिति शुशोच।

**श्रीरङ्गयात्रा : -** श्रीरङ्कराजसेवैव ब्रह्मानन्दसन्धायकः इति श्रीरङ्गनित्यनिवासमैच्छत्। अमात्याः राज्यपालनविघ्नः भवेदिति तदवरोधं कल्पयितुमैच्छन्। राजा सुमुहुर्ते श्रीरङ्गं गच्छन् निरन्तर भगवन्नात्मोच्चरणपरायणः वैष्णवोत्तमेषु मार्गमध्ये दृष्टेषु तद्दर्शनादेव श्रीरङ्गप्रयाणाद्विरराम। विष्णुसेवायाः तद्भक्तसेवैव विशेषफलप्रदः इत्यमन्यत। षष्टिवर्षपर्यन्तं श्रीपतिपूजापेक्षया श्रीवैष्णवमेकवारपूजायां १६ भागफलमपि भवेदितिमेने। ततः कुलशेखरः राज्ये एव विद्यमानः श्रीवैष्णवाराधनमव्याहतं करोति स्म।

**रामायणश्रवणम् -** राजा रामायणे एकं पादं, पदं वा भक्त्या पठनात् श्रवणाद्वा ब्रह्मसायुज्यं स्यादित्यमन्यत। ''श्रृण्वन् रामायणं भक्त्या यः पादं पदमेव वा। स याति ब्रह्मणः स्थानं ब्रह्मणा पूज्यते सदा। अयं राजा द्राविडभाषायां पेरुमाल् तिरुमोलि इति शत पद्यात्मकं हृद्यं काव्यमपि व्यरचीत्। अस्य द्वादशाल्वारुषु विष्णुभक्ति प्रबोधा यैव अवततारेति एकं स्थानं लब्धम्। श्रीमद्रायणमेव मुक्तिसाधनमिति कालयापने क्रियमणे एकस्मिन्दिने..... चतुर्दश सहस्राणि रक्षसां भीमकर्मणां एकः रामो धर्मात्मा कथं युद्धं भविष्यति इति ऋषयोऽमंस्त द्रष्टुकामाः तदद्भुतम् पौराणिकात् श्लोकमेनं श्रुत्वा अद्यैव चतुर्दश रक्षोभिः सहितरावणेन रामः एकः कथं युद्धं करिष्यतीति इति मत्वा धनुर्बाणखड्गायुधानि कवचं धृत्वा चतुरङ्गसैन्येन राम सहायार्थं युद्धाय राजा कुलशेखरः प्रतस्थे। देशं परित्यज्य युद्ध भूमिं गते सति प्रजाणां अराजकराज्यमिति भावना स्यादिति वैष्णवोत्तमानानीय तद्वारा एव वाचयामासुः

**चतुर्दशसहस्राणि रक्षसां भीम कर्तणाम्।**
**अर्धाधिकमुहूर्तेन राधवेणैव सङ्गरे।**
**तेन धर्मात्मनेनैव निहतानि नृपोत्तम**
**तं दृष्ट्वा शत्रु संहारं महर्षीणां मुदावहं**
**बभूव दृष्ट्वा वैदेही भर्तारं परिषस्वजे।।**

भागवतोत्तमानां एतानि वाक्यानिश्रुत्वा तदा राजर्षिः स्वप्रयणं नावश्यकमर्िति पुनः स्वराज्यं प्रति निवृत्तः।



**भक्तिपारवश्यम् -** कुलशेखरचक्रवर्तिनां भक्तिः सामान्यानमलभ्यमेव। तस्य राज्ये वैष्णवभक्तिरहित एकोऽपि नासीत्। विष्णुभक्ति रहितानां मुखं नाहं पश्यमीति शपथमपि कुलशेखरः चकार। पौराणिकाः रामायणे राम महत्त्व घट्टानेव तस्य श्रावयन्ति स्म। एकदा वृद्धपौराणिकः ग्रामान्तरं जगाम। अतः तत्पुत्रः राज्ञे रामायणकथां श्रावयितुं पित्रृकतनियमं विस्मृत्य रावणेन सीतापहणघट्टे ''जहार रावणस्सीतां ....'' एतत्पठणं श्रुत्वा राजा कः मन्मातरं सीतां जहारेति महाक्रोधयुतः कवचशस्त्रास्त्रधारी सन् एकः एव प्रतस्थे। तस्य भक्तिपारवश्यं सङ्गरविनोदं द्रष्टुं सिद्धसाध्यगन्धर्वादिदेवताः आकाशादेव एव पश्यन्तः आसन् राजसेवकाः प्रजाः अपि राजा समुद्रे पतेदिति भयान्दोलनमनस्काः आसन्।तदा भगवान् भक्तवत्सलः सर्वेश्वरः श्रीरामरूपं धृत्वा लक्ष्मणसहितः सीतामपि नयन् तत्पाणिपल्लवं धृत्वा कुलशेखरस्य पुरतः प्रत्यक्षीभूयः ''वत्स! मयिविद्यमाने किमर्थं तवश्रमः। अहमेव रावणं बन्धुमित्रसहितं हत्वा जानक्या सह आगतोऽस्मीत्यवोचत्। इत्येतद्भावना रामचन्द्रमुखे प्रतिफलतया दर्शयित्वा कुलशेखरं आनन्दबाष्पयुतं चकार। तदा कुलशेखरः श्रीरामं अद्भुतवाक्यैः तुष्टाव। झटिति समुद्रप्रवेशमकृत्वा प्रतिनिवृत्तः। झटिति रामदर्शनमदृश्यमभूत्। रामदर्शनसुफलं नयनान्दकरं क्षणकाले दुष्कृतं जातमिति पापत्माहमिति भावयन् दुःखेन अन्तःपुरं प्रविवेश।

**चौर्यारोपणम् -** कुलशेखरः वैष्णवभक्तान् पञ्चभक्ष्यपरमान्नैः सन्तोषयन् भागवतकैङ्कर्येण कालं यापयति स्म। राजामात्याः ''वैष्णवाः अन्तः पुरेऽपिप्रविश्य राजानं नित्यराजकार्यदूरं कुर्वन्तीति मत्वा राज्ञः वैष्णवेषु अविश्वासं जनयितुं उपायमालोच्य उचितसमयार्थं निरीक्षन्ते स्म। श्रीरामनवम्यां सीतारामाभिषेक समये आसन्ने देवालयार्चकाः स्वाम्याभरणानि अपनीय उचित स्थाने भद्रं चक्रुः। तदा राजा केवलं महानन्देन श्रीरामस्य अर्चाविग्रहमेव पश्यति स्म। तदा अमात्याः अयमेवोचितसमयः इति अर्चकै भद्रीकृतश्रीरामस्य मुक्तहारमपहृत्य झटिति रहस्यस्थले निवेशयासुः।

अभिषेकानन्तरं अलङ्करणाय मौक्तिकमालायाः अभावात् भीतचित्ताः राज्ञे निवेदयामासुः। तदा राजा मौक्तिकमालाचोरं कथमपि बध्वा आनयतेति नोचेत् युष्मानपि हनिष्यामीत्य मात्यानवोचत्। तदामात्याः ''धनाशाविष्टैः वैष्णवैः एतन्नित्यकृत्यं कृतंस्यादित्यवोचन्। तदा राजा भागवतोत्तमैः एतच्चौर्यं न कृतमिति प्रमाणपूर्वकं प्रदर्शयिष्यामि इदं मम शपथमिति

**एवमुवाच :-** भागवतदूषकानहं न पश्यामि इति वदन् भागवतस्मरणं कुर्वन् सचेलस्नानमाचर्य ''भागवताः परमपवित्राः। ते न धनाशापराः। इदं चौर्यं तैः न कृतमिति एतस्य इदमेव साक्ष्यमिति महाविषसर्पमानीय हस्तेन दधार। तद्दृश्यं दृष्ट्वा अमात्याः अस्मभ्यं प्राणापायो भवेदिति भीताः स्वभद्रीकृतां मौक्तिकमालामानीय वैष्णवेषु चौर्यारोपणकारणमपि राज्यहितार्थमेवेति अस्माकं प्रयत्नः क्षन्तव्यः इति वैष्णवानां राज्ञः चरणौ च संस्पृश्य प्रार्थयामासुः। विरक्तः राजा विष्णु भक्तविमुखजनैः सहजीवनं नरकयातानानुभवायैवेति विचिन्त्य स्वपृत्रं दृटव्रतं पट्टाभिषिक्तं कृत्वा महोत्साहेन श्रीरङ्गं जगाम। बहुकालपर्यन्तं तत्रस्थित्वा दिव्य देशान् सेवित्वा तदीयाराधनया वैष्णवान् तृप्तान् चकार।

स्वकुमारीं नीलादेवीं श्रीरङ्गनाथस्य भार्यात्वेन समर्प्य सम्पत्सर्वस्वं तस्मै रङ्गनाथदेवाय दत्वा धन्यात्मा बभूव। कुलशेखरः कवितासम्पदा शीलसौन्दर्येण भूमिं शोभान्वितं कृत्वा ६० षष्ठिसंवत्सर परमपदमवाप। रङ्गनाथं वेङ्कटेश्वरं अन्यविष्णुदेवानधिकृत्य'' पेरुमाल् तिरुमोलि'' इति शत पाशुरैः द्राविड प्रबन्धे गानं कृत्वा अजरामरकीर्तिकायः आसीत्। रामभक्ति साम्राज्ये पट्टाभिषिक्तस्य अस्य मुकुन्दमाला एनं सुप्रसिद्धश्चार। मुकुन्दमालारम्भ श्लोकः श्रीवल्लभेति वरदेति दयापरेति भक्तप्रियेति भवलुण्ठन कोविदेति नाथेति नागशयनेत्यालापनं प्रति पदं कुरुमे मुकुन्द। (२८.०२.२०२६) २८ तिथौ कुलशेखराल्वारु वर्ष तिरुनक्षत्रमिति ति.ति.देवस्थान कालनिर्णयपट्टिकायां निर्दिष्टम्।



# भक्तेः असाध्यं किमपि नास्ति

- डा पि.माधवी, चरवाणी - ८५१९८०४७८४

## (भक्तजयदेवः)

**करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तं।**
**वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि।।**

महाभक्तः जयदेवः श्रीमहाविष्णवशेन अस्मिन् प्रपञ्चे भक्तिं प्रबोधयितुं १३शताब्दयां जन्म लेभे। अयं चन्द्रालोकालङ्कारग्रन्थं महावीरचरितनाम्ना रामायणं, गीतगोविन्दं काव्यं प्रणिनाय। गीतगोविन्दे राधाकृष्णप्रेम अमोघं वर्णितम्। श्रीकृष्णविग्रहपुरतः श्लोकेषु गीयमानेषु तस्य भार्या पद्मावती तदनुगुणतया नृत्यं करोति स्म।

विन्ध्यदेशस्य राजा आप्तमित्रं शिष्यश्चासीत्। सः राजा जयदेवोपदेशात् यथातथमनुसरति स्म। भागवतानपि पूजयति स्म। राज्ञः सद्बुद्धेः जयदेवः आनन्दभरितः आसीत्। जयदेवस्य भार्या पद्मावती महापतिव्रता। भर्तुः औन्नत्यं महत्त्वञ्च सम्यक् अजानीत्। सदा तमेव स्मरन्ती सेवते स्म। राजदम्पती जयदेवं तस्य भार्यां पद्मावतीं अत्यन्तभक्तिभावेन सेवेते स्म। कदाचितद्राज्ञी परिचारिकाभिः सह पद्मावती सन्निधावुपविश्य पुण्यकथाः श्रृणोतिस्म। तस्मिन् समये एका परिचारिका विषन्नवदनेन राज्ञीं समीप्य हेमात! तव सोदरः मृतः, सोदरस्य पत्नी चिताग्नौ सहगमनञ्चकारेत्युवाच। तद्विषादवार्तां श्रुत्वा राज्ञी स्वसोदरमृतेः तत्पत्नी सहगमनस्य च महादुःखेन विललाप। परन्तु पद्मावती तच्छृत्वापि निश्चलं मौनेनासीत्। पद्मावतीमौनावलम्बनं राज्ञ्याः कष्टप्रदमासीत्। सोदरमरणस्य सानुभूतिं, तत्पत्नी सहगमनस्य च न सन्तोषं प्रकटितवती। तदा राज्ञी मत्सोदरमरणस्य तत्पत्नीसहगमनस्य च किमर्थं दुःखं न प्रदर्शितवती त्वमिति पद्मावतीमपृच्छत्। तदा पद्मावती ''मरणं शरीरलक्षणम् अत्र शोचनीयकारणं किमपि नास्ति। महापतिव्रता भर्तुमरणवार्तां श्रुत्वा प्राणान् त्यक्तवती इत्यवोचत्। एतानि वचनानि श्रुत्वा राज्ञी आश्चर्य चकिता सती महापतिव्रतेव भाषते इति अस्याः पातिव्रत्यं परीक्षणीयमिति निश्चितवती। अनुकूलसमये राज्ञी सङ्गतिमिमां मन्त्रिणा प्रस्तावितवती। अनुकुलसमये आगते पद्मावती पातिव्रत्यपरीक्षां करिष्यामीत्यवोचत्। कदाचिद्राजा मृगयाविवोदार्थमटवीं जयदेवेन सह जगाम। अयं समयः पद्मावत्या सम्भाषणसमये अमात्यः तयोस्सकाशमागत्य अटव्यां राजा जयदेवेन सह गमन समये व्याघ्रः तदुपरिपपातेति राजा शरीरघातैः कथञ्चित् सुदूरं धावित्वा स्वप्राणान् रक्षितवान्। परन्तु दुरदृष्टवशात् जयदेवः अम्रियत इत्युवाच। राज्ञी तच्छृत्वा दुःखाभिनयं प्रदर्शितवती। पद्मावती तु भूमौ पतित्वा प्राणान् तत्याज। वैद्याः अपि मृतेति ध्रुवीकृतवन्तः। भयभीतचित्ता राज्ञी स्वदुरुपायेन कीदृशोपद्रवः अपकीर्तिश्चागमिष्यतीति मनोवेदनायामासीत्।



एति जीवन्तमानन्दो नरं वर्षशतादपि।



पौरकृत्यकरिण्याः भार्यायाः हननादपि स्वस्य अग्निप्रवेशः एव उचितः इति मर्तुं निर्णीतवान्। गुरुदेवस्य जयदेवस्य अनुमतिं प्राप्तुं तत्सकाशं जगाम। जयदेवः वास्तववृत्तान्तं परिचारिकाद्वारा ज्ञात्वा राजानं मरणप्रयत्नान्निवारयामास। ततः भार्याकलेबरं समीप्य भक्तिपारवश्येन चतुर्विंशत्यष्टपदीभिः भगवन्तं कृष्णमधिकृत्य नृत्यगानञ्चकार। श्रीमहाविष्णुः प्रत्यक्षीभूय पद्मवतींपुनरुज्जीविताञ्चकार। भगवान् भक्तजनवश्यः। भक्तेः असाध्यं किमपि नास्तीति सर्वथा सत्यमेव।

संस्कृत भाषायां जयदेवराय अष्टपदीकाव्यं गीतसाहित्ये जगत्प्रसिद्धम्। आदौ प्रथमाष्टपद्यां श्रीमन्नारायणः प्रतियुगे दुष्ठशिक्षणशिष्टरक्षणार्थंधर्मरक्षणार्थं भूमाववतारेति (गीतावाक्यं) जयदेवः सार्थकं चकार। दिव्यावतारध्यानमाचर्य स्वग्रन्थरचना निर्विघ्नं परिसमाप्तिमेष्यतीति जगत्प्रसिद्ध दशावतारान्तुष्टाव। गीताः रागतालबद्धाः श्रवणपेयाः मधुरातिमधुराः वर्तन्ते।


**प्रथमगीता** - **प्रलयपयोधिजले धृतवानसि वेदं**
**विहित वहित्र चरित्रमखेदम्**
**केशव! धृतमीनशरीर! जय जगदीश हरे ध्रुवम्।**

एतद्गीतगोविन्दकाव्यं दिव्य भगवद्रहस्यगर्भितम्। जीवः मुक्तिं प्राप्तुं तत्वार्थः अस्मिन् काव्ये सम्यक् गर्भितः। राधा जीवः परमात्मनि मधुरभक्तियुतेति एतत्काव्यवैशिष्ट्यम्। श्रीकृष्णपरमात्मा नायकः। भक्तः एवात्र नायिका।

जयदेवस्य गीतगोविन्दरचनद्वारा भगवद्दर्शनं लब्धम्। राधाकृष्णयोः प्रणयलीलाः वर्णयन् १९ अष्टपद्यां प्रिये चारुशीले .... वदसि यदि किञ्चिदपि.... स्मरगरलखण्डनं मम शिरसि मण्डनं देहि पदपल्लवमुदारं.... इति चरणं लिखित्वा श्रीकृष्णः मन्मथतापेन बाध्यमानः तत्तापाग्न्युपशमनार्थं स्वशिरसि राधापल्लवकोमल पादौ निवेशयेति प्रार्थयामासेति लिखन् भगवच्छिरसि राधापादनिवेशः अनुचितमिति व्याकुलमनस्कः जयदेवः अभ्यङ्गनस्नानार्थं गत्वा पुनरागतः। तदा पदमलिखितपद्यामेव, पुनः एव आगत्य तानि पदानि पूरयित्वा भोजनमपि भुक्त्वागमनम् स्वभार्यामुखात् सम्भूत विषयं ज्ञात्वा अमितानन्दभरितः आसीत् एतत् गीत गोविन्दकाव्यं एतादृशमहाद्भूत गेयकाव्यम्।

# जयदेव - अष्टपदी - दशावतारवर्णनम् - मालवरागः

प्रलपयोधिजले धृतवानसि वेदं विहित वहित्रचरित्रमखेदम्
केशव धृतमीनशरीर जय जगदीश हरे ध्रुवम्।
क्षितिरतिविपुलतले तव तिष्ठति पृष्ठे धरणिधरणकिण चक्रगरिष्ठे
केशव धृतकच्छपरुप जय जगदीश हरे ध्रुवम्।
वसति दशनशिखरे धरणीतवलग्ना शशिनिकलङ्ककलेव निमग्ना
केशव धृत सूकररूप जयगजदीश हरे ध्रुवम्।
तव करकमले नखमद्भुतश्रृङ्गं दलितहिरण्यकशिपुवरभृङ्गम्
केशव धृतनरहरिरूप जय जगदीश हरे ध्रुवम्।
छलयति विक्रमणे बलिमद्भुतवामन पदनखनीरजनित जव पावन।
केशव धृतवामनरूप जय जगदीश हरे ध्रुवम्।
क्षत्रियरूधिरमये जगदवगतपापं, स्नपयसि पयसि शमितभव तापम्
केशव धृत भृगुपतिरूप जय जगदीश हरे ध्रुवम्।
वितरसि दिक्षुरणे दिक्पतिकमनीयं दशमुखमौलिबलं रमणीयम्
केशव धृत रामशरीर जय जगदीश हरे ध्रुवम्।
वहसि वपुषि विशदे वसनं जलदाभं हलहति भीतमिलितयमुनाभं
केशव धृतहलधररूप जय जगदीश हरे ध्रुवम्।
विन्दसि यज्ञविधेरहहश्रुतिजातं सदयहृदयदर्शित पशुघातम्
केशवधृत बुद्धशरीर जय जगदीश हरे ध्रुवम्।
म्लेच्छनिवहनिधने कलयसिकरवालं धूमकेतुमिव किमपि करालम्
केशव धृत कल्किशरीर जय जगदीश हरे ध्रुवम्।
श्रीजयदेवकवेरिदमुदितमुदारं श्रृणुशुभदं सुखदंभवसारं
केशवधृत दशविधरूप जय जगदीश हरे ध्रुवम्।



# अहङ्कारः अवमानायैव

- डा.के.कोटेश्वरय्य
चरवाणी-९९८५१२३२६२

गार्ग्यः भरद्वाजमहर्षिशिष्यः। तीक्ष्णबुद्ध्या ब्रह्मचर्यादीक्षया, प्रगाढपरिश्रमेण गार्ग्यः वेदशास्त्रेषु सम्पूर्णाधिकारी सञ्जातः। गुर्वाश्रमागतविद्वद्भिः शास्त्रचर्चाकरणं, तान् परजितान् करणं तस्य विनोदः आसीत्। समावर्तन संस्कारमाचर्य तं भरद्वाजः स्वगृहं प्रेषयामास।तदन्तरं स्वगृहप्रेषणसमये वात्सल्येन एवमुपदिदेश। शिष्य! कदापि गर्वीभूत्वा विद्वांसं अवमानितं माकुरु। एकेन विदुषा अन्यविदुषः अवमानाचरणं शास्त्रविरुद्धम्। अवमानकरणविद्या निरर्थकी। अन्यावमानाचरणात् बुद्धिः - क्रूरा स्यात्। तद्द्वारा समाजहितमपि न स्यात् एवं गुरुपदेशात् गार्ग्यस्वाभिमानस्य विघातं जातम्।

ततः गार्ग्यः महता सन्तोषेण स्वगृहं जगाम। मातृप्रेमप्रदर्शिनीं गुरुपत्नीं सोदरविद्यार्थिबृन्दं स्मरन् पुनः पुनः आश्रमे दृष्टिं प्रसार्य कथञ्चित् गृहं जगाम। गृहागमनानन्तर दारिद्र्यपीडित कुटुम्बजन दैन्यं दृष्ट्वा तप्तहृदयः आसीत्। दिनत्रयं गृहे दुःखेन कालं यापयित्वा धनार्थं पित्रनुमतिं प्राप्य प्रस्थितः। काशीराजः अजातशत्रुः विद्यादानशक्त्या विश्वविख्यातः आसीत्। तत्सकाशं धनार्थं विद्यासमुपार्जनार्थं राजकुमाराः अपि आगच्छन्ति स्म। महापण्डिताः अपि स्वसंशयनिवृत्त्यर्थं अजातशत्रुं मिलन्ति स्म। राजा तेषां सन्देशान् परिहार्य भूरिदक्षिणाभिः सत्करोति स्म। गार्ग्यः अजातशत्रुप्रभावं श्रुत्वा काशीनगरं ययौ। मार्गमध्ये उपमन्योः आश्रमं प्राप्य तद्विनयशीलेन सन्तुष्टः आसीत्। उपमन्युः गार्ग्याय राजदर्शनं प्रापयामास। पण्डितसभास्थः अजातशत्रुः, आचार्यः उपयन्युः शिष्यत्रयेन आगच्छन्तं ज्ञात्वा आगतं उपमन्युं पूजयित्वा मणिमयसिंहासनासीनश्चकार। उपमन्युः नरेन्द्रस्य गर्ग्यपरिचयं कृत्वा स्वप्रयोजन सिद्धये राजदर्शनार्थमागतोऽस्मीत्यवोचत्। तद्वचनेन गार्ग्यस्य अहम्भावस्य विघातमासीत्। तस्य पाण्डित्याहङ्कारः तारास्थयि अभूवत्। औचित्यानौचित्ये विस्मृत्य गर्ग्यः राजानमुद्दिश्य राजन्। त्वया अनेकविद्यार्थिनः अधीतविद्याः। ब्राह्मणप्रवृत्तेः सम्पूर्णाधिकारी भवसि वानवेति त्वया सह शास्त्रचर्चां कर्तुमभिलषामीत्यवोचत्। एतानि वचनानि सभिकेभ्यः व्यथाकारणानि जातानि। अजातशत्रुः स्वविनयं दर्शयन् आर्य! त्वादृशपण्डितप्रकण्डैः शास्त्रचर्चांकर्तुं नेच्छामि। यदितवाभीष्टं श्वः सायंसमये त्वत्सेवार्थमहं संसिद्धः इत्यवोचत्। अद्यत्वं विश्रान्तिं स्वीकुरु इत्यवोचत्। राजवचनेषु गार्ग्यस्य व्यंग्य भावः दृष्टः। आचार्याज्ञया गर्ग्यस्य अभिमानप्रवृत्तिः नग्नरूपे पुत्यक्षीभूता। क्रोधारुणनेत्राभ्यां गार्ग्यः राजन्। त्वत्सेवाः नाहमभिलषामि। ब्रह्मज्ञानविषये तवशक्तिं परीक्षितुमिच्छामि। गार्ग्यस्यपाण्डित्यमदः सभास्थेभ्यः सम्यक् दृष्टः। अनन्तरदिन सायंसमये अतथिशालायां गार्ग्यः अजातशत्रुमश्यत्। ततः शास्त्रचर्चा प्रारब्धा। गर्ग्यस्य प्रथमप्रश्ने एव तस्य ज्ञानपरमितिः अजात शत्रोः ज्ञाता। पराजितः गार्ग्यः स्वाज्ञानस्य चिन्तयन् नष्टाहङ्कारः ज्ञानार्थमजातशत्रुं शरणमवाप।

विदुषामवमाननं नीचसर्पादपि दुःखदायकम्। अहङ्कारिणां विद्या निरर्थकी। अहङ्कारिणां बुद्धिः क्रूरपूर्णा स्यात्। अतः पण्डितैः अहङ्कादूरेः भाव्यम्।



कन्यापितृत्वं दुःखं हि सर्वेषां मानकंक्षिणाम्।

चित्रकथा

# मातृप्रेम माधवमपि वशीकरोति

तेलुगुमूलम् - 'कलारत्न' डा.कम्पेल्ल रविचन्द्रन्
चित्राणि - श्री तुम्बलि शिवाजी
संस्कृतानुवादः - डा.के .सूर्यनारायणरेड्डि
चरवाणी - ८१०६५७८२५०






यादृशं कुरुते कर्म तादृशं फलमश्नुते।



सर्वे वयं बेज्ञमहादेवी गृहं गमिष्यामः। सर्वे वयं परमशिवं स्तुवन्तः शिवस्य स्वस्थता पर्यन्तं निराहाराः निर्विरामं पञ्चाक्षरीमन्त्रं जपिष्यामः।
अस्मत्प्रयत्नं वयं करिष्यामः सर्वैः शुचिभिर्भूत्वा इष्टलिङ्गपूजां कृत्वा अस्मादेव स्थानात् परमशिवं स्तुवन्तः भजन्तः, कीर्तयन्तः गमिष्यामः।
बेज्ञमहादेव्या तदेव कार्यं क्रियते। सा सदा यस्मिन् कस्मिन्नपि कर्मणि विद्यमानाऽपि पञ्चक्षरीमन्त्रं न विस्मरति। सा शिवानुग्रहवती। अतः निरन्तरं शिवध्याने एव वर्तते।
सर्वे ओं नमशिशवाय ओं नमशिशवाय इति गायन्तः बेज्ञमहादेवीगृहं गताः।
कुमार! अहमिमां बाधां सोढुमसमर्थाऽस्मि। त्वयि एव प्राणत्यागे करिष्यामि।
मातः बेज्ञमहादेवि! त्वं किं वरं वांच्छसि दास्यामि।
परमशिव! त्वं स्वसस्थः यदि स्याः, तदेवालम्।
हे भक्ताः! त्वत्सदृशनिर्मलमनांसि एव नैवेद्यानि भवन्ति। कथमस्माकमनारोग्यं स्यात्। मातारः सर्वाः स्वपुत्रान् देवतास्वरूपाणीव सम्भाव्य उपचारान् कुर्वन्त्यः क्रमशिक्षणपराःयदिस्युः सर्वे सुखेन सम्यक् स्युः। अन्यभक्ताः अपि येन केनापि मार्गेण मत्तः यत्किञ्चित् कांक्षन्त्येव। येन केनापि कामेन विना बेज्ञमहादेवी मम माता भूत्वा मां लालितवती। मम मातुः अस्मत्क्षणादेव कैलासे स्थानं सिद्धं भवति।
अनया यूयं सर्वे, युष्मत्कुटुम्बाश्च संसारसागरादुद्धृताः। यूयं सर्वे युष्मत्कर्मपरिपाकानन्तरं कैलासं प्राप्स्यन्ति। अस्याः मातृप्रेम्णः वयं पुनः प्रणमामः।
धन्याः परमशिव! धन्याः वयं सर्वे।

# फिब्रवरि 2026 द्वादशराशीनां मासफलानि

- आचार्य वेदान्तं श्रीविष्णुभट्टाचार्यः, चरवाणी - ९८४९२६४६०७



**१.मेषराशिः** - आध्यात्मिककार्येषु निमग्नता शान्तस्वभावः, तीर्थयात्रासम्भवः अधिकारजनद्वारा पीडा, चिन्तिकार्येषु उद्विग्नता, भातृचिन्तनं, व्यापारलाभः, धनागमनं सम्भवन्ति। लक्ष्मीपूजनं कर्तव्यम्।

**२.वृषभराशिः** - भाग्यलाभः उद्योगकार्येषु मिश्रमफलं, अपरिष्कृतकार्याणां परिष्कार, अज्ञातजनद्वारा साहाय्यप्राप्तिः, आनन्दोल्लासः तदा तदा अशुभस्वाप्नाः सम्भवन्ति। शिवाराधनं कर्तव्यम्।

**३. मिथुनराशिः** - प्रयाणलाभः, ज्वरबाधा, अधिकधनव्ययः, मासपूर्वार्थे मित्रद्वारा हानिः, भ्रातृचिन्ता, सुखहानिः भविष्यन्ति। मासोत्तरार्धे सम्पत्प्राप्तिः आध्यात्मिकचिन्तनं, मित्रलाभः अधिकारजनप्रशंसाः भविष्यन्ति। शनिग्रहाराधनं कर्तव्यम्।

**४.कर्काटकराशि** : - कुटुम्बभिवृद्धिः चिन्तनं, वाक्पारुष्यं, प्रयाणनष्टं, भूलाभः, सन्तोषः धनव्ययः, आरोग्यं शोषणदेहपीडा, अर्थलाभः तदा तदा क्रोधः सम्भविष्यन्ति नवग्रहाराधनं कर्तव्यम्।

**५. सिंहराशिः** - अधिकसुखं, धनलाभः, शत्रुनाशः तदा तदा देहपीडा, स्थानभ्रंशः अर्थसिद्धिः, धर्मकार्येषु चिन्तनं, ग्रन्थपठनं, भूलाभः, गृहे बन्धुमित्रसमागमः संभविष्यन्ति। शिवाराधनं कर्तव्यम्।

**६. कन्याराशिः** - मनसः चञ्चलत्वं, उद्वेगः, अधिकधनव्ययः चिन्तितकार्यसाधनार्थं श्रमः शत्रुद्वाराविजयः, सुखं, प्रीतिभोजनं, प्रयाणलाभः, गृहे विवादाः भविष्यन्ति। नवग्रहाराधनं कर्तव्यम्।

**७. तुलाराशिः** - शुभकाल संप्राप्तिः शीघ्रं चिन्तितकार्याणां साधनं, मनसः आनन्दः, पराक्रमः, शान्तस्वाभावः, उल्लासः, छात्राणां उन्नतविद्यासाधनं, बन्धुमित्रसमागमः तदा तदा मनोभीतिः, प्रीतिभोजनं संभविष्यन्ति।

**८. वृश्चिकराशिः** - मनाभीतिः सद्व्ययः, धनवृद्धिः, भूलाभः, अधिकधनप्राप्तिः, व्यवहारजयः, मित्रलाभः, तीर्थयात्रागमनं, प्रयाणलाभः, तदा तदा शरीरश्रमः आध्यात्मिककार्येषु निमग्नता सम्भविष्यन्ति। शिवाराधनं कर्तव्यम्।

**९. धनूराशिः** - आरोग्यं, बन्धुमित्रसमागमः, मनोल्लासः, भीतिः, भाग्यहानिः, पराक्रमः, सौभाग्यं, वृथापर्यटनं, सन्तोषः अर्थसिद्धिः तदा तदा मनोदुःखं सम्भविष्यन्ति। शनिग्रहाराधनं कर्तव्यम्।

**१०. मकरराशिः** - वाक्पारुष्यं, कुटुम्बजनाभिवृद्धिः, स्थानभ्रंशः, खेदः, भाग्यहानि, आरोग्यं, वाहनभाग्यं, देहपीडा, अकालभोजनं सद्व्ययः तीर्थयात्रागमनं, शोषणं सम्बविष्यन्ति। विष्णवाराधनं कर्तव्यम्।

**११. कुम्भराशिः** - व्ययः, आरोग्यं, वाक्पारुष्यं, संपत्प्राप्तिः, वृथापर्यटनं, मनोभीतिः, शत्रुभीतिः, अकालभोजनं, सम्भविष्यन्त्यपि तदा तदा मनोल्लासः, इष्टजनैः सम्भाषणं, मित्रलाभः भविष्यन्ति। सूर्यग्रहाराधनं कर्तव्यम्।

**१२. मीनराशिः** - धनलाभः, आनन्दः, प्रयाणलाभः, बन्धुमित्रसमागमः, आध्यात्मिकचिन्तनं, ग्रन्थपठनं, एकान्तजीवनं तदा तदा ज्वरपीडा, कार्यहानिः अधिकारजलप्रशंशा संभविष्यन्ति। नवग्रहाराधनं कर्तव्यम्।

कः कं रक्षितुंशक्तो मृत्युकाले।



Printed by Sri R.V.Vijaya Kumar, B.A.B.Ed. and Published by Dr.V.G. Chokkalingam, M.A., Ph.D.,on behalf of Tirumala Tirupati Devasthanams and Printed and Publised at Tirumala Tirupati Devasthanams Press, K.T. Road,Tirupati 517 507.
Editor : Dr.V.G. Chokkalingam, M.A., Ph.D.



## तिरुपतिस्थ
# श्रीकपिलेश्वरस्वामिनः
## ब्रह्मोत्सवः
### 2026 फिब्रवरी 07 तः 17 पर्यन्तम्

| दिनाङ्क | वासरः | प्रातः उत्सवः | रात्रौ उत्सवः |
|---|---|---|---|
| 07-02-2026 | मन्दवासरः | -- | अङ्कुरार्पणम् |
| 08-02-2026 | भानुवासरः | ध्वजारोहणम् | हंसवाहनम् |
| 09-02-2026 | इन्दुवासरः | सूर्यप्रभवाहनम् | चन्द्रप्रभवाहनम् |
| 10-02-2026 | भौमवासरः | भूतवाहनम् | सिंहवानहम् |
| 11-02-2026 | सौम्यवासरः | मकरवाहनम् | शेषवाहनम् |
| 12-02-2026 | बृहस्पतिवासरः | तिरुच्चि उत्सवः | अधिकारनन्दिवाहनम् |
| 13-02-2026 | भृगुवासरः | व्याघ्रवाहनम् | गजवाहनम्, |
| 14-02-2026 | मन्दवासरः | कल्पवृक्षवाहनम् | अश्ववाहनम् |
| 15-02-2026 | भानुवासरः | रथोत्सवः | नन्दिवाहनम्, (महाशिवरात्रिः) |
| 16-02-2026 | इन्दुवासरः | पुरुषमृगवाहनम् | (कल्याणोत्सवः) तिरुच्चि उत्सवः |
| 17-02-2026 | भौमवासरः | सूर्यप्रभवाहने नटराजस्वामिनः त्रिशूलस्नानम् | ध्वजावरोहणम्, रावणासुरवाहनम् |



## तरिगोण्ड
# श्रीलक्ष्मीनृसिंहस्वामिनः
## ब्रह्मोत्सवः

| दिनाङ्क | वासरः | प्रातः उत्सवः | रात्रौ उत्सवः |
|---|---|---|---|
| 23-02-2026 | इन्दुवासरः | -- | अङ्कुरार्पणम् |
| 24-02-2026 | भौमवासरः | ध्वजारोहणम् | -- |
| 28-02-2026 | मन्दवासरः | -- | गरुडवाहनम् |
| 03-03-2026 | भौमवासरः | रथोत्सवः, मौक्तकवाहनम् | -- |
| 04-03-2026 | सौम्यवासरः | चक्रस्नानम् | ध्वजावरोहणम्, |



SAPTHAGIRI (SANSKRIT) SPIRITUAL ILLUSTRATED MONTHLY PUBLISHED BY TIRUMALA TIRUPATI DEVASTHANAMS PRINTING ON 25-01-2025 & posting at Tirupati RMS Regd.with the Registrar of Newspapers for India under RNI No. 21138/1970 Postal Regd. No. TRP/154/2024-2026" LICENCED TO POST WITHOUT PREPAYMENT No.PMGK/RNP/WPP-04(4)/2024-2026" Posting on 1st of every month.

भवजलधिगतानां द्वन्द्ववाताहतानां
सुतदुहितृकलत्रत्राणभारार्दितानां।
विषमविषयतोयेमज्जतामप्लवानां
भवति शरणमेको विष्णुपोतो नराणाम्॥

(कुलशेखराल्वारु)